मूलं भुजंगैः शिखरं प्लवंगैः
शाखा विहंगैः कुसुमानि भृंगैः ।
किं नाम तच्चन्दनपादपस्य
यन्नाश्रितं सत्त्वभरैः समन्तात् ॥

पदच्छेदः - मूलं भुजंगैः, शिखरं प्लवंगैः, शाखा विहंगैः, कुसुमानि भृंगैः, किम् नाम तत् चन्दनपादपस्य यत् न आश्रितम् सत्त्वभरैः समन्तात् ॥

अन्वयः - मूलं भुजंगैः (आश्रितं भवति), शिखरं प्लवंगैः (आश्रितं भवति), शाखा विहंगैः (आश्रिता भवति), कुसुमानि भृंगैः (आश्रितानि भवन्ति) । चन्दपादपस्य किं नाम (अंगम्/अवयवः वा अस्ति) यत् सत्त्वभरैः समन्तात् न आश्रितं (भवति । अर्थात् सर्वं अंगं सर्वः च अवयवः सत्त्वैः प्राणिभिः आश्रितं भवति इत्यर्थः ।)

अर्थः - एतस्मिन्सुभाषिते चन्दनवृक्षस्य महत्त्वं प्रतिपादितम्। तस्य वृक्षस्य सर्वाणि अंगानि सर्वे च अवयवाः सत्त्वैः प्राणिभिः जीवमात्रैः व्यवह्रियन्ते । कथम् इति चेत् - तस्य चन्दनपादपस्य चन्दनवृक्षस्य मूलं नाम मूलभागः भुजंगैः नाम सर्पैः आश्रितः भवति । श्रुयते यत् चन्दनवृक्षस्य मूले सर्पाः वसन्ति इति । शिखरम्, तस्य चन्दनवृक्षस्य शिखरभागः नाम अग्रभागः उपरिभागः ऊर्ध्वभागः वा प्लवंगैः नाम वानरैः कपिभिः मर्कटैः वा आश्रितः भवति । वानराः वृक्षाणाम् उपरि भागे वसन्ति इति तु सुविदितमेव । किन्तु विशेषतः चन्दनवृक्षस्य उपरि शिखरप्रदेशे ऊर्ध्वभागे वा वसन्ति इति इदं सुभाषितं ब्रूते । तस्य चन्दनवृक्षस्य शाखाः विहंगैः आश्रिताः भवन्ति अर्थात् तस्य शाखासु विहंगाः विहगाः विहंगमाः खगाः पक्षिणः वा आश्रयं कुर्वन्ति वासं कुर्वन्ति वसन्ति इत्यर्थः । सामान्यतः पक्षिणः वृक्षाणां शाखासु वसन्ति इति सुपरिचितमेतत् किन्तु चन्दनवृक्षस्य शाखासु विशेषतः आश्रयन्ते तस्य सुगन्धत्वात् । कुसुमानि भृंगैः अर्थात् तस्य चन्दनवृक्षस्य कुसुमानि पुष्पाणि भृंगैः नाम भ्रमरैः आश्रितानि । भ्रमराः पुष्पेषु वसन्ति इति सुविदितमेतत् । किन्तु विशेषतः चन्दनपुष्पेषु वसन्ति यतो हि तस्य सुमधुरः गन्धः भवति । अतः उच्यते चन्दनपादपस्य चन्दनवृक्षस्य किं नाम अंगं विद्यते किं नाम अंगं अस्ति यत् सत्त्वभरैः नाम प्राणिमात्रैः जीवमात्रैः वा न व्यवह्रियते । अर्थात् अयं चन्दनवृक्षः एतादृशः वृक्षः यस्य सर्वे अवयवाः प्राणिभिः व्यवह्रियन्ते, प्रयुज्यन्ते आश्रियन्ते वा । अतः एषः वृक्षः अतीव उपयोगी वृक्षः गुणकारी वृक्षः च भवति । एतस्मिन् सुभाषिते कविना चन्दनवृक्षस्य प्रशंसा कृता महत्त्वञ्च प्रतिपादितम् अस्ति ।

शब्दार्थाः - भुजंगः - सर्पः, भुजगंमः, भुजगः इत्यपि उच्यते । भुजः सन् गच्छति । भुजः कुटिलीभवन् सन् गच्छति इति ।
प्लवंगः - वानरः, कपिः, मर्कटः वा । उत्प्लुत्य गच्छति इति ।

विहंगः - विहगंमः, विहगः, खगः, पक्षी वा । विहायसि गच्छति इति ।
भृंगः - भ्रमरः भ्रमरकः वा ।
पादपः - पादैः मूलैः पिबति इति । वृक्षः, तरुः वा ।
सत्त्वभरः - प्राणी, जीवः, जन्तुः वा ।
समन्तात् - सर्वतः, परितः वा ।